## प्रश्ने चासन्नकाले । (११७/२७७७)

[1]भूतानद्यतनपरोक्षे इति वर्तते । तस्य विशेषणमेतत् । प्रष्टव्यः प्रश्नः । आसन्नकाले पृच्छ्यमाने भूतानद्यतनपरोक्षेऽर्थे वर्तमानाद् धातोः लङ्लिटौ प्रत्ययौ भवतः । कश्चित् कञ्चित् पृच्छति । अगच्छद् देवदत्तः ? जगाम देवदत्तः ? अयजद् देवदत्तः ? इयाज देवदत्तः ? प्रश्ने इति किम् ? जगाम देवदत्तः । [2]आसन्नकाले इति किम् ? भवन्तं पृच्छामि, जघान कंसं किल वासुदेवः ? ॥

## लट् स्मे । (११८/२७७८)

भूतान[3]द्यतनपरोक्षे इति वर्तते । स्मशब्दे उपपदे भूतानद्यतनपरोक्षे[4] लट् प्रत्ययो भवति । लिटोऽपवादः । [5]नडेन स्म पुराधीयते । [6]ऊर्णया स्म पुराधीयते ॥

## अपरोक्षे च । (११९/२७७९)

अपरोक्षे च भूतानद्यतनेऽर्थे वर्तमानाद् धातोः [7]स्मे उपपदे लट् प्रत्ययो भवति । [8]एवं स्म[9] पिता ब्रवीति । [10]इति स्मोपाध्यायः कथयति ॥

## ननौ पृष्टप्रतिवचने । (१२०/२७८०)

[11]अनद्यतने परोक्षे इति निवृत्तम् । भूतसामान्ये विधिरयम् । ननुशब्दे उपपदे प्रश्नपूर्वके प्रतिवचने[12] [13]भूतेऽर्थे लट् प्रत्ययो भवति । [14]लुङोऽपवादः । अकार्षीः कटं देवदत्त ? ननु करोमि भोः । अवोचस्तत्र किंचिद् [15]देवदत्त ? ननु ब्रवीमि भोः । पृष्टप्रतिवचने इति किम् ? ननु अकार्षीत् माणवकः ॥

## नन्वोर्विभाषा । (१२१/२७८१)

भूते इत्येव[16] । नशब्दे नुशब्दे च उपपदे पृष्टप्रतिवचने विभाषा लट् प्रत्ययो भवति भूते[17] । अकार्षीः कटं देवदत्त ? न करोमि भोः, नाकार्षम् । अहं नु करोमि, [18]अहं नु अकार्षम् ॥

## पुरि लुङ् चास्मे । (१२२/२७८२)

अनद्यतनग्रहणमिह मण्डूकप्लुत्याऽनुवर्तते । पुराशब्दे उपपदे [19]स्मशब्दवर्जिते [20]भूतानद्यतनेऽर्थे विभाषा लुङ् प्रत्ययो भवति, लट् च । ताभ्यां मुक्ते पक्षे यथाविषयमन्येऽपि प्रत्यया भवन्ति । वसन्तीह पुरा छात्राः, अवात्सुरिह पुरा छात्राः, अवसन्निह पुरा छात्राः, ऊषुरिह [21]पुरा छात्राः । अस्मे इति [22]किम् ? नडेन स्म पुरा अधीयते ॥

---

1. भूते इति वर्तते फ. 2. पञ्चवर्षाभ्यन्तरं आसन्नकालः इत्यधिकम् फ. 3. अनद्यतन नास्ति फ. 4. वर्तमानात् धातोः इत्यधिकम् ब.ड.फ.ह. 5. नटेन क. 6. उदाहरणमिदं नास्ति फ. 7. स्मशब्दे अ.ब.क. ड.फ.ह. 8. अपरोक्षे इत्यधिकम् अ. 9. मे इत्यधिकम् अ. 10. परोक्षे इत्यधिकम् अ. 11. अनद्यतने—लुङोऽपवादः नास्ति ह. 12. गम्यमाने इत्यधिकम् अ. ब. क. ड. फ. 13. भूते अ. ब, धातोः इत्यधिकम् फ. 14. लुङोऽपवादः नास्ति अ.ब.क. 15. देवदत्त नास्ति फ, किं देवदत्त अ.ब. 16. वर्तते इत्यधिकम् फ. 17. अर्थे वर्तमानात् धातोः इत्यधिकम् फ. 18. भो इत्यधिकम् फ. 19. स्मवर्जिते ब.क. 20. भूतेऽनद्यतने क, धातोः इत्यधिकम् फ. 21. वा इत्यधिकम् फ. 22. किम् नास्ति क.